श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री-कामासिकाष्टकम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्री-कामासिकाष्टकम् ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रुतीनामुत्तरं भागं वेगवत्याश्च दक्षिणम्।
कामादधिवसन् जीयात् कश्चिदद्भुत केसरी॥ १॥

तपनेन्द्वग्नि नयनः तापानपचिनोतु नः।
तापनीय रहस्यानां सारः कामासिका हरिः॥ २॥

आकण्ठमादिपुरुषं कण्ठीरवमुपरि कुण्ठितारातिम्।
वेगोपकण्ठ सङ्गात् विमुक्त वैकुण्ठ बहुमतिमुपासे॥ ३॥

बन्धुमखिलस्य जन्तोः बन्धुर पर्यङ्क बन्ध रमणीयम्।
विषम विलोचनमीडे वेगवती पुळिन केळि नरसिंहम्॥ ४॥

स्व स्थानेषु मरुद्गणान् नियमयन् स्वाधीन सर्वेन्द्रियः
पर्यङ्क स्थिर धारणा प्रकटित प्रत्यङ्मुखावस्थितिः।
प्रायेण प्रणिपेदुषां प्रभुरसौ योगं निजं शिक्षयन्
कामानातनुता दशेष जगतां कामासिका केसरी॥ ५॥

विकस्वर नख स्वरु क्षत हिरण्य वक्षः स्थली
निरर्गळ विनिर्गळद्रुधिर सिन्धु सन्ध्यायिताः।
अवन्तु मदनासिका मनुज पञ्च वक्त्रस्य माम्
अहंप्रथमिका मिथः प्रकटिताहवा बाहवः॥ ६॥

सटा पटल भीषणे सरभसाट्टहासोद्भटे
स्फुरत्क्रुधि परिस्फुटद् भ्रुकुटिकेऽपि वक्त्रे कृते।
कृपा कपट केसरिन् दनुज डिम्भ दत्त स्तना
सरोज सदृशा दृशा व्यतिभिषज्य ते व्यज्यते॥ ७॥

त्वयि रक्षति रक्षकैः किमन्यैः त्वयि चारक्षति रक्षकैः किमन्यैः।
इति निश्चित धीः श्रयामि नित्यं नृहरे वेगवती तटाश्रयं त्वाम्॥ ८॥

इत्थं स्तुतः सकृदिहाष्टभिरेष पद्यैः श्रीवेङ्कटेश रचितैस्त्रिदशेन्द्र वन्द्यः।
दुर्दान्त घोर दुरित द्विरदेन्द्र भेदी कामासिका नरहरिर्वितनोतु कामान्॥ ९॥

॥ इति श्री-कामासिकाष्टकम् समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥